# shrIChinnamastAkavacham

# શ્રીછિન્નમસ્તાકવચમ્

## Document Information

Text title : shriichhinnamastaakavacham

File name : chhinnamastaakavach.itx

Category : kavacha, devii, dashamahAvidyA, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : shrIbhairavatantre bhairavabhairavIsa.nvAde trailokyavijayaM nAma

Latest update : August 21, 2008

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીછિન્નમસ્તાકવચમ્

શ્રીગણેશાય નમઃ ।
દેવ્યુવાચ ।
કથિતાચ્છિન્નમસ્તાયા યા યા વિદ્યા સુગોપિતાઃ ।
ત્વયા નાથેન જીવેશ શ્રુતાશ્ચાધિગતા મયા ॥ ૧॥

ઇદાનીં શ્રોતુમિચ્છામિ કવચં સર્વસૂચિતમ્ ।
ત્રૈલોક્યવિજયં નામ કૃપયા કથ્યતાં પ્રભો ॥ ૨॥

ભૈરવ ઉવાચ ।
શ્રુણુ વક્ષ્યામિ દેવેશિ સર્વદેવનમસ્કૃતે ।
ત્રૈલોક્યવિજયં નામ કવચં સર્વમોહનમ્ ॥ ૩॥

સર્વવિદ્યામયં સાક્ષાત્સુરાત્સુરજયપ્રદમ્ ।
ધારણાત્પઠનાદીશસ્ત્રૈલોક્યવિજયી વિભુઃ ॥ ૪॥

બ્રહ્મા નારાયણો રુદ્રો ધારણાત્પઠનાદ્યતઃ ।
કર્તા પાતા ચ સંહર્તા ભુવનાનાં સુરેશ્વરિ ॥ ૫॥

ન દેયં પરશિષ્યેભ્યોઽભક્તેભ્યોઽપિ વિશેષતઃ ।
દેયં શિષ્યાય ભક્તાય પ્રાણેભ્યોઽપ્યધિકાય ચ ॥ ૬॥

દેવ્યાશ્ચ ચ્છિન્નમસ્તાયાઃ કવચસ્ય ચ ભૈરવઃ ।
ઋષિસ્તુ સ્યાદ્વિરાટ્ છન્દો દેવતા ચ્છિન્નમસ્તકા ॥ ૭॥

ત્રૈલોક્યવિજયે મુક્તૌ વિનિયોગઃ પ્રકીર્તિતઃ ।
હુંકારો મે શિરઃ પાતુ છિન્નમસ્તા બલપ્રદા ॥ ૮॥

હ્રાં હૂં ઐં ત્ર્યક્ષરી પાતુ ભાલં વક્ત્રં દિગમ્બરા ।
શ્રીં હ્રીં હૂં ઐં દૃશૌ પાતુ મુણ્ડં કર્ત્રિધરાપિ સા ॥ ૯॥

સા વિદ્યા પ્રણવાદ્યન્તા શ્રુતિયુગ્મં સદાઽવતુ ।

વજ્રવૈરોચનીયે હું ફટ્ સ્વાહા ચ ધ્રુવાદિકા ॥ ૧૦॥

ઘ્રાણં પાતુ ચ્છિન્નમસ્તા મુણ્ડકર્ત્રિવિધારિણી ।
શ્રીમાયાકૂર્ચવાગ્બીજૈર્વજ્રવૈરોચનીયહૂમ્ ॥ ૧૧॥

હૂં ફટ્ સ્વાહા મહાવિદ્યા ષોડશી બ્રહ્મરૂપિણી ।
સ્વપાર્શ્વે વર્ણિની ચાસૃગ્ધારાં પાયયતી મુદા ॥ ૧૨॥

વદનં સર્વદા પાતુ ચ્છિન્નમસ્તા સ્વશક્તિકા ।
મુણ્ડકર્ત્રિધરા રક્તા સાધકાભીષ્ટદાયિની ॥ ૧૩॥

વર્ણિની ડાકિનીયુક્તા સાપિ મામભિતોઽવતુ ।
રામાદ્યા પાતુ જિહ્વાં ચ લજ્જાદ્યા પાતુ કણ્ઠકમ્ ॥ ૧૪॥

કૂર્ચાદ્યા હૃદયં પાતુ વાગાદ્યા સ્તનયુગ્મકમ્ ।
રમયા પુટિતા વિદ્યા પાર્શ્વૌ પાતુ સુરેશ્વરી ॥ ૧૫॥

માયયા પુટિતા પાતુ નાભિદેશે દિગમ્બરા ।
કૂર્ચેણ પુટિતા દેવી પૃષ્ઠદેશે સદાઽવતુ ॥ ૧૬॥

વાગ્બીજપુટિતા ચૈષા મધ્યં પાતુ સશક્તિકા ।
ઈશ્વરી કૂર્ચવાગ્બીજૈર્વજ્રવૈરોચનીયહૂમ્ ॥ ૧૭॥

હૂંફટ્ સ્વાહા મહાવિદ્યા કોટિસૂર્ય્યસમપ્રભા ।
છિન્નમસ્તા સદા પાયાદુરુયુગ્મં સશક્તિકા ॥ ૧૮॥

હ્રીં હૂં વર્ણિની જાનું શ્રીં હ્રીં ચ ડાકિની પદમ્ ।
સર્વવિદ્યાસ્થિતા નિત્યા સર્વાઙ્ગં મે સદાઽવતુ ॥ ૧૯॥

પ્રાચ્યાં પાયાદેકલિઙ્ગા યોગિની પાવકેઽવતુ ।
ડાકિની દક્ષિણે પાતુ શ્રીમહાભૈરવી ચ મામ્ ॥ ૨૦॥

નૈરૃત્યાં સતતં પાતુ ભૈરવી પશ્ચિમેઽવતુ ।
ઇન્દ્રાક્ષી પાતુ વાયવ્યેઽસિતાઙ્ગી પાતુ ચોત્તરે ॥ ૨૧॥

સંહારિણી સદા પાતુ શિવકોણે સકર્ત્રિકા ।
ઇત્યષ્ટશક્તયઃ પાન્તુ દિગ્વિદિક્ષુ સકર્ત્રિકાઃ ॥ ૨૨॥

ક્રીં ક્રીં ક્રીં પાતુ સા પૂર્વં હ્રીં હ્રીં માં પાતુ પાવકે ।
હૂં હૂં માં દક્ષિણે પાતુ દક્ષિણે કાલિકાઽવતુ ॥ ૨૩॥

ક્રીં ક્રીં ક્રીં ચૈવ નૈરૃત્યાં હ્રીં હ્રીં ચ પશ્ચિમેઽવતુ ।
હૂં હૂં પાતુ મરુત્કોણે સ્વાહા પાતુ સદોત્તરે ॥ ૨૪॥

મહાકાલી ખડ્ગહસ્તા રક્ષઃકોણે સદાઽવતુ ।
તારો માયા વધૂઃ કૂર્ચં ફટ્ કારોઽયં મહામનુઃ ॥ ૨૫॥

ખડ્ગકર્ત્રિધરા તારા ચોર્ધ્વદેશં સદાઽવતુ ।
હ્રીં સ્ત્રીં હૂં ફટ્ ચ પાતાલે માં પાતુ ચૈકજટા સતી ।
તારા તુ સહિતા ખેઽવ્યાન્મહાનીલસરસ્વતી ॥ ૨૬॥

ઇતિ તે કથિતં દેવ્યાઃ કવચં મન્ત્રવિગ્રહમ્ ।
યદ્ધૃત્વા પઠનાન્ભીમઃ ક્રોધાખ્યો ભૈરવઃ સ્મૃતઃ ॥ ૨૭॥

સુરાસુરમુનીન્દ્રાણાં કર્તા હર્તા ભવેત્સ્વયમ્ ।
યસ્યાજ્ઞયા મધુમતી યાતિ સા સાધકાલયમ્ ॥ ૨૮॥

ભૂતિન્યાદ્યાશ્ચ ડાકિન્યો યક્ષિણ્યાદ્યાશ્ચ ખેચરાઃ ।
આજ્ઞાં ગૃહ્ણંતિ તાસ્તસ્ય કવચસ્ય પ્રસાદતઃ ॥ ૨૯॥

એતદેવં પરં બ્રહ્મકવચં મન્મુખોદિતમ્ ।
દેવીમભ્યર્ચ્ય ગન્ધાદ્યૈર્મૂલેનૈવ પઠેત્સકૃત્ ॥ ૩૦॥

સંવત્સરકૃતાયાસ્તુ પૂજાયાઃ ફલમાપ્નુયાત્ ।
ભૂર્જે વિલિખિતં ચૈતદ્ગુટિકાં કાઞ્ચનસ્થિતામ્ ॥ ૩૧॥

ધારયેદ્દક્ષિણે બાહૌ કણ્ઠે વા યદિ વાન્યતઃ ।
સર્વૈશ્વર્યયુતો ભૂત્વા ત્રૈલોક્યં વશમાનયેત્ ॥ ૩૨॥

તસ્ય ગેહે વસેલ્લક્ષ્મીર્વાણી ચ વદનામ્બુજે ।
બ્રહ્માસ્ત્રાદીનિ શસ્ત્રાણિ તદ્ગાત્રે યાન્તિ સૌમ્યતામ્ ॥ ૩૩॥

ઇદં કવચમજ્ઞાત્વા યો ભજેચ્છિન્નમસ્તકામ્ ।
સોઽપિ શસ્ત્રપ્રહારેણ મૃત્યુમાપ્નોતિ સત્વરમ્ ॥ ૩૪॥

॥ ઇતિ શ્રીભૈરવતન્ત્રે ભૈરવભૈરવીસંવાદે
ત્રૈલોક્યવિજયં નામ છિન્નમસ્તાકવચં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*shrIChinnamastAkavacham*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*